


dwarakasharadapeetham@gmail.com

शारदा
संपादक: वसन्त अ. गाडगीळ
सौर १ ज्येष्ठ १९०४
२२ मे १९८२

पश्चिमाम्नाय - द्वारका - शारदापीठ - जगद्गुरु - श्रीशंकराचार्य

## परमपूज्य- श्री स्व रू पा न न्द स र स्व ती -महाराज

आविर्भावः २५ ऑगस्ट १९२४ पीठाभिषेकः २७ मे १९८२

# श्रीद्वारका - प ट्टा भि षे क - म हो त्स व - विशेषाङ्कः ।

## भारतवर्षे सर्वप्रियं ऑफ्सेट-यन्त्ररत्न-त्रयम्

आन्ध्र-केरळ-तमिळनाडु-कर्णाटक-गोमन्तक-महाराष्ट्र-मध्यप्रदेश-गुजरात-राजस्थान-पञ्जाब-दिल्ली-उत्तरप्रदेश-बिहार-वङ्ग-प्रभृति-राज्येषु —

श्रीहरिकोटा (सिल्लूरपेट)-सहारणपुर-अमदाबाद-वटोदर-जमशेटपुर-कलकत्ता-जोधपुर-भो(ज)पाल-दिल्ली-बेती-बङ्गलोर-तिरुअनन्तपुर(त्रिवेन्द्रम्)कोडाईकनाल-मद्रासमुम्बई-पुण्यपत्तन-नागपुर-अकोला-वणी-अमरावती-प्रभृती-नगरेषु —

**स्विफ्ट्स् १५० स्विफ्ट्स् ३०० तथा सर्वप्रियं तृतीयं 'स्विफ्ट्स् टेबलटॉप ९९' यन्त्राणि विराजन्ते ।**

स्वयम् आगत्य द्रष्टव्यं संपूर्ण-भारतीयं यन्त्र-रत्न-त्रयम् ।

## स्विफ्ट्स् प्रायव्हेट लिमिटेड

मराठे-उद्योग-भवनम्, अप्पासाहेब मराठे-मार्गः

प्रभादेवी, मुम्बई ४०० ०२५

(दूरवाणी ४२२१३२२, ४२२२४४३)

dwarakasharadapeetham@gmail.com

शृङ्गेरी-द्वारका-ज्योतिष्पीठाचार्य-स्वीकृता शासन-पुरस्कृता विश्वप्रिया

सौर १ ज्येष्ठ १९०४ । २२ मे १९८२

# शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् २३ अङ्कः १४

वार्षिकं मूल्यं रू. २० ❁ अस्य अङ्कस्य रू. १-२५

ॐ

## ॥ महानुशासनम् ॥

शुचिर्जितेन्द्रियो वेद-वेदाङ्गादि-विशारदः ।
योगज्ञः सर्वशास्त्राणां स मदास्थानमाप्नुयात् ॥

उक्त-लक्षण-संपन्नः स्यात् चेत् मत्पीठभाग् भवेत् ।
अन्यथारूढ-पीठोऽपि निग्रहार्हो मनीषिणाम ॥

न जातु मठमुच्छिन्द्यादधिकारिण्युपस्थिते ।
विघ्नानामपि बाहुल्याद् एष धर्मः सनातनः ॥

अस्मत्पीठ-समारूढः परिव्राड् उक्त-लक्षणः ।
अहम् एवेति विज्ञेयो यस्य देव इति श्रुतेः ॥

केवलं धर्ममुद्दिश्य विभवो ब्रह्मचेतसाम् ।
विहितश्चोपकाराय पद्मपत्रनयं व्रजेत् ॥

धर्मो मूलं मनुष्याणां स चाचार्यावलम्बनः ।
तस्मादाचार्य-सुमणेः शासनं सर्वतोऽधिकम् ॥

— भगवत्पूज्यपाद आद्य-शंकराचार्यः

dwarakasharadapeetham@gmail.com

dwarakasharadapeetham@gmail.com

# न रत्नमन्विष्यति मृग्यते हि तत् ।

पश्चिमाम्नाय-द्वारका-पीठाधीश्वराः श्रीमद्-अभिनव-सच्चिदानन्द-तीर्थ - स्वामिमहाराजाः ब्रह्मभावं प्राप्ताः ७ एप्रिल १९८२ दिने । एते सप्तसप्ततितमाः पीठाधीश्वराः द्वारकापीठस्य । तेषां स्थाने अष्टसप्तति-तम - पीठाधीशतया कस्य कदा कथं नियुक्तिः स्याद् इति महती चिन्ता औत्सुक्यमूला सर्वत्र प्रवृद्धा श्रुता ज्ञाता च अस्माभिः । परं १९ एप्रिल ८२ दिने प्रभासपट्टण - क्षेत्रे ब्रह्मीभूतानां द्वारकाधीश्वराणां ब्रह्मोत्सवे समुपस्थितैः 'शारदा'कारैः न केवलं ज्ञातः श्रुतश्च निर्णयः द्वारका-पीठोत्तराधिकारिविषये परं येषां नामोद्घोषणा ब्रह्मीभूतानां 'श्री' - चरणानां स्वेच्छा - पत्रानुसारं प्रकटतां गता, ते स्वयम् अ न न्त श्री - वि भू षि ताः प. पू. ज्योतिष्पीठाधीश्वराः श्रीस्वरूपानन्दस्वामि-'श्री' - चरणाः समुपस्थिताः साक्षात्कृताः प्रभासपाटणे, सहर्षम् अभिनन्दिताः सादरम् अभिवादिताश्च पीठ - स्वीकारार्थम् । अष्ट - सप्तति - तम - पीठाधीशत्वेन पश्चिमाम्नायस्य ।

सांप्रतिके कराले कलिकाले, सर्वत्र वर्धिष्णुतां गच्छति धर्मविरोध-भावे, धूर्तैः धर्मशत्रुभिः पाखण्डैः प्रवर्तिते सर्व-सामान्य-जनानां बुद्धि-भेदे च कश्चन प्रखरः, धर्मस्वरूपः, शास्त्राचार - विचार - मात्र-निष्ठः, महोत्तुङ्ग-व्यक्तिमत्त्व-शीलः, चण्ड-स्वरूपः, पुरुषश्रेष्ठः चिराय प्रतीक्षितः सव-पीठं रिक्तम् अलंकर्तुम् । प. पू. श्रीस्वरूपानन्दस्वामिनां तत्र योजना नाम सुवर्ण-कस्तूरिका-संयोगः इति मन्यामहे ।

धर्मविरुद्धानां विध्वंसनं कृत्वा सद्धर्म-प्रतिष्ठापनाय सौजन्य-सौशील्य-धार्मिक - जनानुरागिता - संपादनादि - दैवी - गुण - संपद् - विभूषितानां प. पू. स्वरूपानन्दसरस्वती - 'श्री' - चरणानां तत्र नियुक्ति ज्ञात्वा परम-प्रसन्नैः प. पू. श्रीशृङ्गेरी-शारदा-पीठाधीश्वरैः स्वयंस्फुर्तं प्रेषितं पत्ररत्नम् 'अ क्ष र म्' अत्र 'शा र दा ङ्के' प्रकाशितम् अस्माभिः । तत् पाठं पा

dwarakashardapeetham@gmail.com

सर्वेऽपि धार्मिकाः लोकाः नन्दन्ति नन्दन्ति नन्दन्त्येव । तेन भगवत्पूज्य-पाद-प्रतिष्ठापितानां चतुराम्नाय-पीठानां मैत्री वृद्धिम् एष्यति, नचिरमेव 'धर्मो विश्वस्य जगतः प्रतिष्ठा' इति सत्योक्तेः सत्यताम् अवगत्य सर्वे जनाः 'सनातनधर्मः शरणम् ।' इति तथ्यं सादरं सश्रद्धं च स्वीकरिष्यन्ति इति द्रढीयान् नो विश्वासः ।

इदं तु निश्चप्रचं यत् प. पू. श्रीशृङ्गेरी-शारदा-पीठाधीश्वराणां शुभ-कर-कमलाभ्यां पट्टाभिषेकं द्वारका-क्षेत्रे २७ मे १९८२ अमृत-योगे साक्षात्कृत्य स्वाभाविकम् एव सर्वे समुपस्थिताः स्वाभिप्रायम् आविष्करिष्यन्ति कालिदासगिरा यत् —

'न रत्नमन्विष्यति मृग्यते हि तत् ।'

卐

॥ द्वारका-पट्टाभिषेक-शुभचिन्तनम् ॥

## जनता सहकारी बॅङ्क लि., पुणे २

प्रधान-कार्यालय :— १४४४ शुक्रवारपेठ,
थोरले बाजीराव मार्गः, पुण्यपत्तनम् ४११ ००२
दूरवाणी — ४४३२५८, ४४३२५९, ४४३४३०
४४६८७४,

का. श्री. काकतकर
कार्यकारी संचालकः

dwarakasharadapeetham@gmail.com





**श्री शृङ्गेरी जगद्गुरु महासंस्थानम्, शारदापीठम्**

शृङ्गेरी - कडूर, कर्नाटक स्टेट

PRIVATE SECRETARY
TO HIS HOLINESS THE JAGADGURU
MAHASWAMIGALAVARU OF SRINGERI MATH
SARADA PEETHAM
P. O. SRINGERI (KADUR) 577139 KARNATAKA STATE

No

Camp : बम्बई
दुंदुभि चैत्र कृष्णैकादशी .
Date : 19-4-83

परमहंस परिव्राजकाचार्य श्रीशंकराचार्य-परम्पराप्राप्त श्रीस्वरू-
पानन्द सरस्वती स्वामिनः . ब्रह्मात्मानुसन्धानं समुल्लसति।

भवतां सौजन्य-सौशील्यादिगुणान् आचार्य भगवत्पादभक्तिं धार्मिकजनानुरागितां च आकलितवतां अस्माकं भवत्सु आदरातिशय इति भवन्तोपि जानन्त्येव। सम्प्रति आचार्यपुरुषेण विराजिते श्रीद्वारकापीठे भवन्तः अभिषिच्यन्ते इति वार्ता कर्णपथमुपगता। अनया वार्तया वयं नितरां प्रसीदामः। भवतां पीठनिर्वहणावसरे पीठस्य कीर्तिः नितरां उज्वला भविष्यति, धर्मस्य अध्यात्मविद्यायाश्च विशिष्टः प्रसरः भविष्यति, लोकाः सर्वे श्रद्धामाधास्यन्ति, आचार्य भगवत्पाद प्रतिष्ठितानां पीठानां मैत्री वृद्धिमेष्यतीति च दृढं विश्वसिमः। श्रीशारदाचन्द्रमौलीश्वरयोः आराध्यदेवयोः अनुकम्पया पीठारोहण महोत्सवः सकललोकसुखंकरः भविष्यतीति विश्वसिमः ,

इति नारायणस्मरणम्

विद्यातीर्थः

dwarakasharadapeetham@gmail.com

॥ श्रीहरिः ॥

अनन्तश्रीविभूषित-श्रीजगद्गुरु-श्रीशंकराचार्य-ज्योतिष्पीठाधीश्वर

## श्रीस्वामी स्वरूपानन्द सरस्वतीजी महाराज

ज्योतिर्मठ ( बदरिकाश्रम ) हिमालय

परमहंसी गङ्गाक्षेत्रम्
युवावैक्रमे वै. शु. ५
२८ एप्रिल ८२ आद्यशंकरजयन्त्याम्

---

परमहंसपरिव्राजकाचार्येषु श्रीशंकराचार्यवर्येषु सविनयम् ॐ हरिरिति प्रत्यग्-ब्रह्मैक्यानुसंधान-पूर्वकं यतिवाचा नमस्कृतिः —

आचार्यप्रवर !

तत्रभवतां भवतां प्रमोद-पूर-पूरितं पत्रं समुपलब्धम् । भवदीयां स्नेहस्निग्धां भावनां समनुभूय समुल्लसति नश्चेतः। भवद्-वात्सल्यमय्या भावनाया एवेदं परिणमनं यद् धर्मस्य, अध्यात्मविद्यायाश्च प्रसरः, पीठस्योज्ज्वलं यशश्च विघ्ननिरसनपूर्वकं समेधत इति निश्चप्रचम् ।

आगामिनि कालेऽपि तत्रभवतां भवतां वात्सल्यमयोऽनुग्रहः समेधेतास्मान् विनेयान् भवदनुगतान् भूयो भूयो विनिवेदयामह इति शम् ।

इति नारायणस्मरणम्
स्वरूपानन्द सरस्वती

dwarakasharadapeetham@gmail.com

---

( प. पू. श्रीस्वरूपानन्दस्वामि - महाराजानां द्वारका - पीठाधीश्वरत्वेन नियुक्तिं ज्ञात्वा सपदि प. पू. श्रीशृङ्गेरी - शारदा - पीठाधीश्वर - 'श्री'-चरणैः प्रेषितं हृद्यं पत्ररत्नं तत्प्रत्युत्तरं च इति द्वितयम् अपि पत्र - रत्न-मञ्जूषेतिहासे अभूतपूर्वं भागधेयम् मत्वा शारदा - वाचकानां श्रेयसे प्रकाश्यते। —संपादकः ।)

---

# ॥ श्रीद्वारका-शारदा-पीठाचार्य-परंपरा ॥

[ क्रिस्तपूर्व ४८९ तः क्रिस्तोत्तरम् १९८२ ]

| | | | |
|---|---|---|---|
| १ | ब्रह्मस्वरूपाचार्य | क्रिस्तपूर्व | ४८९-४४७ |
| २ | चित्सुखाचार्य | | ४४७-४२३ |
| ३ | सर्वज्ञानाचार्य | | ४२३-३६४ |
| ४ | ब्रह्मानन्दतीर्थ | | ३६४-३१५ |
| ५ | स्वरूपाभिज्ञाचार्य | | ३१५-२४८ |
| ६ | मङ्गलमूर्त्याचार्य | | २४८-१९६ |
| ७ | भास्कराचार्य | | १९६-१७३ |
| ८ | प्रज्ञानाचार्य | | १७३-१३० |
| ९ | ब्रह्मज्योतिषाचार्य | | १३०-९८ |
| १० | आनन्दभवाचार्य | | ९८-३३ |
| ११ | कलानिधितीर्थ | | ३३-२५ |
| १२ | चिद्‌विलासाचार्य | | २५-६१ क्रिस्तोत्तरम्। |
| १३ | विभूत्यानन्दाचार्य | | ६१-९५ |
| १४ | स्मृतिनिलयपाद | | ९६-१४५ |
| १५ | वरतन्त्रीपाद | | १४५-१९१ |
| १६ | योगारूढाचार्य | | १९१-३०२ |
| १७ | विज्ञानडिण्डिमाचार्य | | ३०२-३३६ |
| १८ | विद्यातीर्थ | | ३३६-३७९ |
| १९ | चिच्छक्तिदेशिक | | ३७९-४२५ |
| २० | विज्ञानेश्वरतीर्थ | | ४२५-४५३ |
| २१ | ऋतम्भराचार्य | | ४५३-५१४ |
| २२ | अमरेश्वरगुरु | | ५१४-५५० |
| २३ | सर्वशिखातीर्थ | | ५५०-६११ |
| २४ | स्वानन्ददेशिक | | ६११-६७१ |
| २५ | समर रसिक | | ६७१-७४१ |
| २६ | नारायणाश्रम | | ७४१-७७८ |

dwarakasharadapeetham@gmail.com

| | | |
|---|---|---|
| २७ | वैकुण्ठाश्रम | ७७८-८२७ |
| २८ | त्रिविक्रमाश्रम | ८२७-८५३ |
| २९ | शशिशेखराश्रम | ८५३-९०२ |
| ३० | त्र्यम्बकाश्रम | ९०२-९१० |
| ३१ | चिदम्बराश्रम | ९१०-९४३ |
| ३२ | केशवाश्रम | ९४३-१००२ |
| ३३ | चिदम्बराश्रम-२ | १००२-१०२५ |
| ३४ | पद्मनाभाश्रम | १०२५-१०५० |
| ३५ | महादेवाश्रम | १०५०-१०९० |
| ३६ | सच्चिदानन्दाश्रम | १०९०-११४९ |
| ३७ | विद्याशंकराश्रम | ११४९-१२०७ |
| ३८ | अभिनवसच्चिदानन्दाश्रम | १२०७-१२३५ |
| ३९ | नृसिंहाश्रम | १२३५-१२६८ |
| ४० | वासुदेवाश्रम | १२६८-१३०३ |
| ४१ | पुरुषोत्तमाश्रम | १३०३-१३३६ |
| ४२ | ज्ञानसाधनाश्रम | १३३६-१३५० |
| ४३ | हरिहराश्रम | १३५०-१३५३ |
| ४४ | भावाश्रम | १३५३-१३६३ |
| ४५ | ब्रह्माश्रम | १३६३-१३७८ |
| ४६ | वासनाश्रम | १३७८-१३९५ |
| ४७ | सर्वज्ञानाश्रम | १३९५-१४३१ |
| ४८ | प्रद्युम्नाश्रम | १४३१-१४३७ |
| ४९ | गोविन्दाश्रम | १४३७-१४६५ |
| ५० | चिदाश्रम | १४६५-१५१८ |
| ५१ | विश्वेश्वराश्रम | १५१८-१५५० |
| ५२ | दामोदराश्रम | १५५०-१५५७ |
| ५३ | महादेवाश्रम | १५५७-१५५८ |
| ५४ | अनिरुद्धाश्रम | १५५८-१५६७ |
| ५५ | अच्युताश्रम | १५६७-१५७१ |

| | |
|---|---|
| ५६ माधवाश्रम | १५७१-१६२७ |
| ५७ आनन्दाश्रम | १६२७-१६५८ |
| ५८ विश्वरूपाश्रम | १६५८-१६६३ |
| ५९ चिद्घनाश्रम | १६६३-१६६४ |
| ६० नृसिंहाश्रम | १६६४-१६७७ |
| ६१ मनोहराश्रम | १६७७-१७०३ |
| ६२ प्रकाशानन्द-सरस्वती | १७०३-१७३७ |
| ६३ विशुद्धानन्द आश्रम | १७३७-१७४० |
| ६४ वामनाश्रम | १७४ -१७७३ |
| ६५ केशवाश्रम | १७७३-१७४० |
| ६६ मधुसूदनाश्रम | १७८०-१७९० |
| ६७ हयग्रीवाश्रम | १७९०-१८०४ |
| ६८ प्रकाशाश्रम | १८०४-१८०५ |
| ६९ हयग्रीवाश्रम-सरस्वती | १८०५-१८१६ |
| ७० श्रीधराश्रम | १८१६-१८५६ |
| ७१ दामोदराश्रम | १८५६-१८७१ |
| ७२ केशवाश्रम | १८७१-१८७७ |
| ७३ राजराजेश्वर-शंकराश्रम | १८७७-१९०० |
| ७४ माधवतीर्थ महाराज | १९००-१९१६ |
| ७५ शान्तानन्द-सरस्वती | १९१६-१९२५ |
| ७६ चन्द्रशेखराश्रम | १९२५-१९४५ |
| ७७ अभिनवसच्चिदानन्दतीर्थ | १९४५-१९८२ |



७८ श्रीस्वरूपानन्द-सरस्वती    १९८२—

# आशीरभिनन्दन - पद्य - मालिका

(ब्रह्मलीन-जगद्गुरु-श्रीमदभिनवसच्चिदानन्दतीर्थस्वामि-पट्टाभिषेकावसरे (२०-६-१९४५) समुपस्थितैः श्रीगोवर्धन-पीठाधीश्वर-जगद्गुरु-श्रीशंकराचार्यैः श्रीभारतीतीर्थ-स्वामि-महाराजैः प्रणीता पद्य-रत्न - मालिका विशेषाङ्केऽस्मिन् पुनः प्रकाश्यते शारदोपासकानां कृते । श्रीद्वारकापीठाधीश्वर-सचिवोत्तमानां पं. महाबलभट्टशास्त्रिमहोदयानाम् अकम्पानुकम्पामूल-शारदा-प्रेरणा सौजन्यातिशयेन च पद्य-रत्न-माला समये समधिगता 'शारदा'-कारैः इति स्वीयम् अहोभाग्यं कृतज्ञता-पुरःसरम् अक्षरीकर्तुम् इच्छामः । — संपादकः)

---

कल्याणाय सुरासुर-शेखरकोटीररत्नदीपाल्या ।
नीराजितपादाब्जं पर्वत-तनुजा-तनूजनिं वन्दे ॥ १

अप्यसुहारिण्यापद्यदीय-दयया कथंचिदुदतारि ।
मृत्यु-विदारि-कुठारं भव-भय-शमनं भजे गुरूत्तंसम् ॥ २

कमलासन-कमलेक्षण-कमलारि-कलाधरा-सुकान्तानाम् ।
शरणं ढौके चरणानघहृस्मरणान् भवार्ति-संहरणान् ॥ ३

दारान् विधेरुदारान् करुणापूरान् कराब्जधृतकीरान् ।
हीरालंकृतहारान् जगदाधारान् विभावये धीरान् ॥ ४

कण्ठ-ग्रहे प्रथम-राग-घने पुरारेरानन्द-मीलित-निजाक्षियुगी भवानी ।
कालादि-कूट-गरलाहृतिमूर्छितेयं किं वेति साध्वस-वशीकृत-वल्लभाव्यात् ॥ ५

गोकर्णाधिपति-प्रिय-स्वहृदयं गोपाल-गोवत्स-युग्-
गोकर्णारि-सुदाम-मुख्य-सुहृदं गोकर्ण-मुक्ति-प्रदम् ।
गोकर्णाद्यखिलान्तरारि-शमनं गोवर्गनिग्राहकम्
गोकर्णाधिप-भोग-भाञ्चित-तनुं गोपाल-बालं भजे ॥ ६

संघात-संघात-भयेन बुद्धा-पार्थाय पार्थाय पुरा श्रुतीनाम् ।
सारांश-सारांशमुवाच यः स्व-गीतासु गीतासु तमीशमीडे ॥ ७

dwarkasharadapeetham@gmail.com

भूयो भूयो जन्म-मृत्यु-प्रवाह-स्वान्त-स्वान्त-ध्वान्त-विध्वंसनार्थम् ।
तत्त्वातत्त्वातीत-तत्त्व-स्वरूपं भूभृद्-भूभृज्जन्मजानिं प्रपद्ये ॥ ८

कलित-कलि-तमोऽन्त-क्षीरवाराशिकन्या-
रमण-रमण-रामामण्डित-स्वीय-वाम ।
शमन-शमन-मूर्ते सच्चिदानन्द-मूर्ते
सकल-सकल-विद्या-पारदायिन् प्रभोऽव ॥ ९

ब्रह्माणं स्वीय-नाभि-प्रभव-कमलतः प्रागविधायाथ तस्मै
लीलान्यायेन नैजश्वसितसृतिमिव प्राहिणोदप्रयत्नम् ।
यो वै वेदांश्च लोक-त्रितय-सृजिकृते स्वात्म-बुद्धि-प्रकाशम्
बन्ध-त्रातान् मुमुक्षुः शरणमहमये देवता-सार्वभौमम् ॥ १०

उक्ता येन विमुक्ति-तत्पर-मनोलोकोद्दिधीर्षावशात्-
कारुण्याम्बुधिनाखिल-श्रुति-शिरस्तात्पर्य-सूत्रावली ।
तस्यै तस्य महामुनीन्द्र-कुलराड्द्वैपायनस्यांघ्रिवार्-
जात-द्वन्द्व-रजांसि मानसरजोद्वन्द्वान्तकृत्तं श्रये ॥ ११

कल्यादौ तद्-गरिम्णा श्रुति-तति-गदित-ज्ञानकर्मादि मार्ग-
ग्लानिं पाखण्ड-वृद्धिं जगति बहुततां वीक्ष्य पाखण्ड-नष्टयै ।
धर्माव्यवस्थापनार्थं यति-पति-तनुभृच्छंकराचार्यरूपो
योऽवातार्षीन्महीं श्रीगिरिपति-तनुजा-जानिरव्यादजस्रम् ॥ १२

उद्धारार्थं मुमुक्षोररचिषत पुरा ब्रह्मसूत्राणि यानि
कृष्णद्वैपायनेन श्रुति-पर-मतिनाम्नायशीर्षार्थैत्रवक्त्रा ।
कृत्वा भाष्यं तदीयं निखिल-बुधनुतं गूढ-तत्त्वोपदेष्टा
निर्द्वैतानन्ददायी भुवि जयति सदा शंकरो देशिकेन्द्रः ॥ १३

सरोभव-विलोचनाकृति-सरोज-पादाभिधान्
सरोभवसमुद्भवाकृति-सुरेश्वरार्यांस्तथा ।
सुतोटकसमाहूय-स्व-कर-वर्ति-धात्र्यौ तत-
श्चतुर्मठपरंपरां स्वहृदि भावये सन्ततम् ॥ १४

आचार्येन्द्र-स्थापित-श‍ृङ्गक्षोणी-धरस्थ-पीठेशान् ।
श्रीमद्धरणी-देशिक-पादान् विद्यागुरून्निजान् ॥ १५

श्रीसच्चिदानन्द-शिवाभिनव्य-नृसिंह-भारत्यभिधान्यतीन्द्रान् ।
विद्यानिधीन् मन्त्रनिधीन् गुणाब्धीन् भजे कृपाब्धीञ्छिवनव्य-रूपान् ॥ १६

तुङ्गाभद्रा-संगम-क्षेत्रराज-च्छृङ्गक्ष्माभृत्पीठगाचार्यवर्यान् ।
श्रद्धा-भक्ति-ज्ञान-विज्ञान-मूर्तीन्नौमि श्रीमच्छंकरान् भारतीन्द्रान् ॥ १७

मूलद्वारगतश्री-द्वारवती-मठ-परंपरा-प्राप्तान् ।
श्रीमत्कृष्णानन्द-स्वाख्यान् कलये जगद्गुरूननिशम् ॥ १८

त्रिकोण-निलय-स्थितां त्रि-नयन-क्रुधाप्लोषित-
त्रिविक्रम-सुता-सुदां त्रिपुरसुन्दरी-संज्ञिकाम् ।
त्रिविक्रमसहोद्भवां त्रिविध-ताप-निर्मूलिनीं
त्रिलोचन-कुटुम्बिनीं त्रिपथगा-सपत्नीं मुदा ॥ १९

त्रिकालमुत सन्ततं त्रिकरणीविशुद्ध्यार्चतस्-
त्रिलोक-जननीमुमां त्रिपथगा-पवित्राङ्घ्रिकान् ॥
त्रिविक्रमसमाह्वयांस्त्रिभुवनेड्यतीर्थान् गुरू-
स्त्रिलोचन-नवाकृतींस्त्रिगुण-हैन्य-सिद्ध्यै श्रये ॥ २०

श्रीमच्छंकर-देशिक-पुङ्गव-कर-पाथोरुह-संस्थापितरम्य-
श्रीगोवर्धनपीठाधिष्ठित-धात्री-शंकर-देशिक-मणिदेवान् ।
श्रीमच्छंकर-साक्षान्नव्याकृति-साक्षात्कृति-धन्यीकृत-भक्तान्-
श्रीमधुसूदन-तीर्थ-गुरूत्तम-गङ्गा-पावन-चरणान् हृदि कलये ॥ २१

मामेति यो मनुज एष भवेद्-विमुक्तो
दुःखाम्बुधौ पुनरसौ न निमज्जतीह ।
सर्गे न तस्य सृजिरस्ति लये लयो नो
मद्धाम विद्धि परमं न यतो निवृत्तिः ॥ २२

यो मामेति पुमाननन्य-विषय-श्रद्धास्फुरन्मानस-
स्वाक्ष-स्वान्त-मतिः स बन्धनिवहान् मुक्तिं गतः शाश्वतीम् ।

नाना-दुःखनिधौ पुनःपुनरिति-प्रेत्याकृतौ संसृतौ
नो मज्जत्यपुनर्भवं परपदं यद्विद्धि तद्धाम मे ॥ २३

इत्थं दुःखविवर्जित-सच्चित्सुखात्मनिजरूपम् ।
गमनागमन-विहीनं लक्ष्यं प्रतिपाद्य मोक्षाख्यम् ॥ २४

मय्यासक्त-मनाः पृथातनु-जने निष्काम-कर्माभिधम्
युञ्जन्योगममुं मदेक-शरणो यो मां नरः संश्रयेत् ।
निःसन्देहमयं समग्रमपि मां साक्षात्कृतेरध्वना
तूर्णं ज्ञास्यति सर्व-बन्ध-निवहान् मोक्षं च संप्राप्स्यति ॥ २५

विजित्याहंकार-प्रमुख-निखिलाराति-निकरान्
विधत्ते यः कृत्यं विहितमनिशं निःस्पृहतया ।
द्रुतं कार्तार्थ्यं स व्रजति परमात्मैक्य-फलकम्
पुमानित्याद्युक्त्या निज-वदन-पद्मेन यदुराट् ॥ २६

आह सनातन-धर्म-प्रतिपादित-कर्म-योगं यम् ।
भक्ति-श्रद्धा-सहकृतमेवेप्सित-मुक्ति-साधनत्वेन ॥ २७

स्वपुनःस्थापित-शाश्वत-धर्मस्यास्यानिश-प्रचार-कृते ।
पुर्यां शृङ्ग-क्षिति-भृति कुशस्थले बदरिका-क्षेत्रे ॥ २८

वेदान्तार्थ-व्याख्या-चतुरान् सिंहासनेषु यतिसिंहान् ।
चतुरश्चतुरः शिष्यान् स्वीयान् स्व-मठेषु येषु संस्थाप्य ॥ २९

आचार्येन्द्रो नोज्झित-स्वीय-वर्ष्मा कैलासेशो नैजमोको डुढौके ।
मध्ये तेषां श्राव्यते द्वारकायाः प्रासङ्गोऽसावैतिहासोऽद्य लेशः ॥ ३०

कदाचन द्वारवती-मठेशा आचार्यवर्या जनतोपकृत्यै ।
धर्म-प्रचारार्थमितस्ततः स्व-कर्तव्य-संचार-पराः स्वपुर्याः ॥ ३१

निष्क्रम्य तस्यां दिशि दक्षिणस्यां नितान्तदूरं लघु जग्मिवांसः ।
कृत्यानि नित्यानि निजानि कृत्वा धर्मोपदेश-प्रवणाः क्रमेण ॥ ३२

महीशूर-राष्ट्रे शिव-प्रान्त-मध्ये शुभे तुङ्गभद्रा-तटे तीर्थ-पल्ल्याः ।
समीपेऽथ तत्रत्य-भूप-प्रमुख्य-स्वभक्त-व्रजाभ्यर्थितास्तीर्थवर्ये ॥ ३३

अपार-संसार-निजाख्य-घोर-सिन्धुं तरीतुं भव-बन्ध-मुक्तिम् ।
लब्धुं च यत्रर्षि-वरेण घोरा दुर्वाससाकारि महा-तपस्या ॥ ३४

तत्र राजमणि-मस्तक-रत्न-प्रेम-निर्मित-महा-मठ-वर्ये ।
द्वारका-मठ-समर्च्य-सुराली-मन्दिरालि-लसिते निवसन्तः ॥ ३५

"आस्माकीनं पीठ-पारम्परीणं मूल-स्थानं द्वारका-क्षेत्रमेव ।"
इत्यर्थस्य स्मारणार्थं स्व-नव्य-स्थानं मूल-द्वार-संज्ञं विधाय ॥ ३६

श्रीराधिका-हैमवती-समेत-श्रीद्वारकाधीश्वर-चन्द्रमौली ।
श्रीशंकराचार्य-पदाब्जभृङ्गाः श्रीशारदादींस्त्रिदशान् समार्चन् ॥ ३७

तत्राचार्येन्द्र एकः शम-दम-विरति-क्षान्ति-मुख्यामलश्री-
संपद्देदीप्यमानोऽखिल-विध-विषय-व्रात-संपर्क-हीनीम् ।
अभ्यस्य ध्यान-मग्नश्चिर-विहित-तपोवह्नि-राजत्स्वशीर्षः
श्रीकृष्णानन्द-संज्ञामलभत-हुतभुङ्मूर्ध-पूर्वां मनोज्ञाम् ॥ ३८

तत्तादृक्ष-गुरूत्तम-व्रज-लसत्पारम्परीमध्यतः
कृष्णानन्दयतीश्वरा उदगमन्नित्य-प्रसन्नाननाः ।
यत्पादाम्बुज-दर्शनार्चन-मुखोपास्ति-प्रमुख्याप्तितो
धन्यत्वं वयमात्मनोऽत्यसुलभं पूर्वाश्रमेऽमंस्महि ॥ ३९

आचित्याचर्यान्यैराचाराच्चार्यतां लभते ।
इत्याचार्यनिरुक्तिः स्पष्टीकुरुतेऽर्थमत्यर्थम् ॥ ४०

स्वाध्यायाध्ययनं विधाय विधिवत्स्वाधीतवेदोदित-
स्वानुष्ठेय-समस्त-कर्म-निकरानुष्ठानमप्यन्वहम् ।
श्रद्धा-भक्ति-युतं स्वयं च विदधद्यः स्यादनुष्ठापक-
स्तस्याचार्यपदार्हता निगदिता नान्यस्य कस्याप्यहो ॥ ४१

जन्तूनां विविधाकृति-प्रकृति-धी-वृत्यादि-भिन्नात्मनाम्
मध्ये मानव-जन्म दुर्लभमिति ग्रन्थे विवेकादिमे ।
चूडामण्यभिधे निजे प्रथमतः श्रुत्यन्तभाष्यादिकृत्-
श्रीमच्छंकर-देशिकेन्द्र-भगवत्पादैः स्फुटं वर्णितम् ॥ ४२

dwarkashaardapeetham@gmail.com

एतद्देश-प्रसूताग्रज-कुलजनुषो मानवालेः सकाशात्
सर्वं संशिक्षणीयं निज-निज-चरितं मानवैः सर्वथापि ।
सर्वक्षोणीतलस्थैः सुखलभिनिरतैः सन्ततं लिप्स्यमान-
श्रेयोधाराप्रवाहैरिति किल कथितं मानवे धर्मशास्त्रे ॥ ४३

सर्वेषां भू-स्थितानामिह-पर-शुभ-कृत्साधन-ज्ञान-दाता
वर्णानां ब्राह्मणः स्याद् गुरुरिति निखिल-ग्रन्थ-जालान्तराणि ।
स्पष्टं यस्मात्समस्तान्यभिदधति किलाम्नायमुख्यान्यजस्रम्
तस्मात्क्षोणी-गुरुत्वं द्विज-कुलज-तनोर्निश्चितं मानवस्य ॥ ४४

श्रुति विद्या-लीनामखिल-भुवनाली-स्थिति-जुषाम्
कलानां सर्वासामपि-जनि-धरित्री-पद-चणाम् ।
प्रमाणैर्निश्चित्यावनिगजनतां भारतजनु-
र्जनोत्पन्नोत्पन्नां विविशयकणं तद्वदखिलाम् ॥ ४५

समस्त-विद्या-व्रज-जन्म-भूमौ मनुष्य-जातेश्च जनुर्धरण्याम् ।
श्रीभारते देश-कदम्ब-कोटि-कोटीर-रत्ने जनिमान् प्रकृष्टः ॥ ४६

इत्येव पाश्चात्त्यवदुत्तमानां सर्वत्र संप्रत्यखिलेडितानाम् ।
विनिश्चितं देशततीतिहास-विज्ञान-शास्त्रादि-बलेन किं च ॥ ४७

तत्रत्य-विद्वत्स्वपि तत्त्व-बोधन-प्रमुख्य-संसक्तमति-व्रजैर्जनुः ।
श्रीभारतेऽस्माभिरभीप्स्यते पुनर्भूयः पुनश्चेत्यनिशं निगद्यते ॥ ४८

तन्मध्ये यज्ञ-मुख्याखिल-विधकृतिषु स्वर्ग-मध्यस्थ-तत्त-
द्देवोद्देशेन दत्तं सकलमपि हविःकव्यमुख्यं पदार्थम् ।
तस्मै तस्मै सुराय श्रुति-गत-विधितो यद्धिनोत्येष तस्माद्
अग्निर्वै देवतानां मुखमिति भगवानाह वेदः स्वयं यम् ॥ ४९

प्रथमश्रुत्याः प्रथमाध्याये प्रथमाष्टकस्य यः प्रथमः ।
मन्त्रस्तस्य प्रथमः शब्दो यं यज्ञपतिं पुरोहितं स्तौति ॥ ५०

पितृणमुक्त्यै सदपत्यमीप्सुर्यत्सन्निधावास्तिक-सज्जनाली ।
पाणिग्रहेणैव गृहस्थधर्मे प्राप्ताधिकारा भवति प्रजायै ॥ ५१

यः शम्भुफालात्प्रभवं प्रवृत्तो भस्मीचकार स्मर-देहमारात् ।
यस्यैव सान्निध्यमुपेत्य शम्भुर्जग्राह भूभृत्तनयाकराब्जम् ॥ ५२

नो केवलं शुचितया स्वयमस्ति किंच
स्वीयांघ्रिपद्मसविधं समुपागतेभ्यः ।
तद्वर्ति-सर्व-विध-कश्मल-जाल-दग्ध्या
दत्ते शुचित्वमिति यः शुचिरुच्यते च ॥ ५३

धरा-धराधीश-तनु-प्रजाता-समस्त-विश्वेश्वर-वष्म-जन्मा ।
सुपर्व-वर्ग-व्रज-वाहिनीनीस्त्रिलोक-सद्योतर-तीव्र-तेजाः ॥ ५४

महोग्रवीर्याञ्चित-तारकाख्य-दैत्यासुहृत्यामरतारणार्थम् ।
अरक्षि येन त्रिगच्छुभार्थं यस्माद् गुहोऽभूत् शुचिज-स्व-नामा ॥ ५५

य एव वैश्वानर रूप-धर्ता समस्त-जन्तु-व्रज-काय-वर्गे ।
चतुर्विधान्नानि पचञ्छरीर-नैरोग्य-हेतुर्निखिलेप्सनीयः ॥ ५६

यो गार्हपत्याहवनीय-मुख्य-निजस्वरूपेण गृहेषु तिष्ठन् ।
यज्ञादि-कर्म-प्रवणैर्गृहस्थैर्निलिम्प-पित्रर्थ-वितीर्ण-वस्तु ॥ ५७

स्वाहा-स्वधाधीशतया गृहीत्वा तत्तत्सकाशं गमयन्नजस्रम् ।
गृहस्थ-धर्म-प्रतिपालकानां करोति रक्षामतिजागरूकः ॥ ५८

अन्ते स्वदेहान् प्रकृतिस्वभावाद् विमुच्य यत्संस्कृति-संस्कृताङ्गाः ।
गतिं निजेष्टा गृहिणो व्रजन्तो नीयन्त आरात्सुपथेन राये ॥ ५९

काली कराली च मनोजवा च सु-लोहिताख्या च सु-धूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुचीनिजाख्या लेलायमाना इति सप्तजिह्वाः ॥ ६०

संकीर्तिता यस्य च मुण्डकाख्य-श्रुत्युत्तमाङ्गस्थित-मन्त्र-वर्णे ।
वेदोक्त-होमादि-कृतां जनानां नाके मुदा स्वागत-कारिका याः ॥ ६१

योऽखिल वैदिक-कर्म-प्रचये गीर्वाण-वदनता-हेतोः ।
सर्वश्रोत्रियपूज्यश्चकास्ति सर्वोत्तम-स्वरूपेण ॥ ६२

जगती-गुरु-भारत-गुरु-विप्रगुरुत्वं तदीयमिति कृत्वा ।
वास्तवमखिल-गुरुत्व, स्पष्टं नितरां यदीयमिति सिद्धम् ॥ ६३

नरेण नारायणसारथित्व-सौभाग्यभाजा महतादरेण ।
सन्तर्पितः खाण्डवदाहनेन तस्मै च गाण्डीव-मुखान् व्यतार्षीत् ॥ ६४

ब्रह्माण्ड-पिण्डाण्ड-कदम्ब-धात्रा तस्याथ धर्त्रा प्रलये च हर्त्रा ।
श्रीराम-कृष्णादिम-रूप-धर्त्रा योऽतर्पि सर्पिःप्रमुखैरकर्त्रा ॥ ६५

अग्नौ यद्वद्भस्मतामेति काष्ठं तद्वत्कर्माख्येन्धनं ज्ञानवह्नौ ।
ज्ञानाच्चित्तप्लोषिताशेषकर्म-व्रातं विद्यात्पण्डितं नो तदन्यम् ॥ ६६

इत्यात्मैक्यज्ञानविश्राणनैक-दत्त-स्वेक्षे ज्ञानकाण्डे तथैव ।
विद्यामात्रस्योपमानस्थलेषु वह्निर्ज्ञानस्योपमानं गृहीतः ॥ ६७

काण्ड-त्रयेणेत्थमुदात्तशब्दैः संवर्णित-स्वीय-महा-महिम्नः ।
यज्ञेश्वरस्यामल-भक्ति-कर्म-ब्रह्म-स्वरूपस्य धनञ्जयस्य ॥ ६८

विघ्नेश-नारायण-शम्भु-सूर्य-शक्ति-त्रयाणामपि पूजनेन ।
वेदोक्त-धर्माचरणेन शस्त-चारित्रतः श्रोत्रियतामुपेत्य ॥ ६९

कर्मप्राप्यांस्तु लोकानपि खलु निखिलान्नश्वरत्वेन बुद्ध्वा
कर्मभ्यस्तत्फलेभ्यः समुदितविरुचिर्ब्राह्मणोऽसौ विरज्य ।
उत्पाद्यो नैव मोक्षः कृति-गण-फलता नैव तस्येति कृत्वा
तज्ज्ञानार्थं स गच्छेद् गुरुमखिलमिदं श्रोत्रियं ब्रह्म-निष्ठम् ॥ ७०

इति मुण्डक-वेद-शिरः कथित-क्रमतो निज-बोधमवाप्य खलु ।
जगतीगुरुतामयते गुणवान् कृतिमान्यमवान्निज-बोधबलात् ॥ ७१

शुचिताजिताक्षताश्रुति-वेदाङ्गादि-प्रवीणता-पूर्वम् ।
सर्वैनय-व्रज-योग-ज्ञातैवार्हति जगद्गुरुत्वमिति ॥ ७२

पीठ-चतुष्टयविषयक-माठाम्नाये निज-ग्रन्थे ।
शंकरभगवत्पादैरप्याम्नातं किल स्पष्टम् ॥ ७३

तस्मादुक्त-सुलक्षण-ततिसंपन्नोत्तराधिकारि-कृते ।
सन्तत-चिन्ता-विवश-स्वान्ताः सन्तो गवेषयन्ति स्म ॥ ७४

आरब्धकर्मनशितः पतनोन्मुखत्वं
नैसर्गिकं क्रमश ईयुषि विग्रहे (वर्ष्मणि) स्वे ।

आजन्म-भोग-विरताशयता-मुमुक्षा-
जिज्ञासुता-प्रमुख-सुन्दर-सद्गुणाढ्यम् ।। ७५

धर्मोपदेशमुखपैठकृती: समस्ताः सम्यग्विधातुमधिकारिणमर्भकं त्वाम् ।
संलक्ष्य सत्वरमहो चरमाश्रमं ते प्रावीविशन्निजकराम्बुजतस्तदर्हम् ।। ७६

"प्राचीनवैदिकमतप्रतिपादनेऽसावानेष्यतेऽखिलमनोहरभव्यरीतिम् ।
निर्भीकनव्यविषये" त्यभिनव्यपूर्वं सच्चित्सुखाभिधमनूदितवस्त्वकार्षुः।।७७

निजसामयजुर्मुखमन्त्रततेरकृथाः पठनं कृतिकाण्डगतान् ।
विषयान् विविधान् द्विजमुख्यहितानपि शिक्षितवान् पुरुयत्नतया ।। ७८

संन्यस्यात्मश्रवणं कुर्याद् इति वेदविहितमनुरुध्य ।
आबाल्याद् इत्थं त्वं सन्न्यस्यात्मप्रबोधमापोऽरम् ।। ७९

कालधर्मं गते स्वे गुरौ तत्कृतीः
शास्त्रतः पीठ-देव-व्रजार्चामुखाः ।
आचरन् धर्मसंबोधनैश्चाखिलान्
प्रीणयन् मोदयन् राजसे स्मानिशम् ।। ८०

एतन्मध्ये श्रीप्रभासत्थ-नैज-पारम्पर्यां शारदा-भद्र-पीठे ।
आचार्यत्वेनाभ्यसेचि स्वरूपानन्दाख्यो योऽस्माभिरेषोऽस्मदीयः ।। ८१

वर्षाणां विंशति स्वं श्रुतिशिरउदितं साध्वनुष्ठाय धर्मम् ।
शास्त्र-व्याख्या-प्रणाली-सरस-सरलता-भासि-तत्त्वोपदेशैः ।
भक्तव्रातान् असंख्यान् निजगुणमणिभिश्चानिशं ह्लादयित्वा
शिष्योत्तंसावतंसस्तनु-रहित-परब्रह्म-भूयं किलागात् ।। ८२

यस्मादासीस्तस्य स्थानेऽस्मत्प्रेरितेन तेनैव ।
श्रीद्वारवती-पीठाधीशत्वेन त्वमेव निर्दिष्टः ।। ८३

ततोऽस्माभिरारात् तदिच्छानुसारं नवद्वारकापत्तने डङ्कनाम्ना ।
प्रसिद्धे द्विजन्माग्रगण्यैः समेतैर्व्यधायि त्वदीयोऽभिषेको द्वितीयः ।। ८४

तदनु श्रीद्वार्वत्या आस्तिक-जनता-व्रजेन विविधविया ।
मतभेद-लेश-रहितं निरचायिष्टास्त्वमेव खल्वहह ।। ८५

तेन वटोदर-राज-प्रकृति-व्रात-प्रजादिभिश्चाद्य ।
ऊरीकृत्य क्षितिगुरु-शंकरपीठेऽभिषिच्यसे भूयः ॥ ८६

"एकस्मिन् वपुषि प्रणीय भगवंस्तेऽनुग्रहेण ध्रुवं
मूलद्वारगुरुं प्रभासगगुरुं द्वारावतीषद्गुरुम् ।
अस्माच्छङ्करदेशिकेन्द्र-भगवत्पादाब्जसेवालवात्
कार्तार्थ्यं निजवर्ष्मणोऽस्य जनुषो मंस्येतरां सद्गुरो ॥" ८७

मूलद्वारमठे स्व-पूर्व-वयसि प्रेमाञ्चितश्रद्धया
कृष्णानन्द-यतीट्-पवित्र-चरणाम्भोजातयुग्माग्रतः ।
अस्माभिः समकल्पि तावकजनैः पूर्वं यदित्थं शिशो
सिद्धं तत्समवेक्ष्य संप्रति समुत्तीर्ण-प्रतिज्ञा वयम् ॥ ८८

स्थाने स्थाने स्थान एवं त्वदीयाम् आचार्येन्द्रस्थान एतां प्रतिष्ठाम् ।
वीक्ष्यास्माकं मोदमानेऽपि सत्यं स्वान्ते स्वान्तर्नास्ति तृप्तिर्यतोऽदः ॥ ८९

आशास्महे श्रीभगवत्कृपाबलात् श्रीडङ्कमौनीन्द्रपुरस्थिते मठे ।
श्रीशारदाम्बा-मुखपीठदेवता-मूर्तीरवाप्या अभिषेकमाप्नुयाः ॥ ९०

आशिषः प्रयुञ्ज्महेऽभ्यर्थयाम ईश्वरी-
रीश्वरांश्च सर्वदा मुक्ति-शक्ति-साधनम् ।
दीर्घमायुरामयैर्हीनमेव तेऽनिशम्
दातुमिष्ट-निर्मलानन्द-पूर-पूरितम् ॥ ९१

प्रथमं मूलद्वारे पृथ्वी-गुरुभिर्निज-करकमलेन ।
श्रीमत्कृष्णानन्दैः पीठाधीशीकृतं तदनु ॥ ९२

अन्तेवासि-शिरोमणेर्यमिमणेः सिद्धान्तविद्न्मणेः
प्राणायामिमणेर्जितेन्द्रियमणेर्व्रतिच्छचूडामणेः :
अद्वैतामृत-पायि-मस्तकमणेर्धर्माशुभूषामणे-
रज्ञानाख्य-महान्धकार-खमणेर्भक्तालि-चूडामणेः ॥ ९३

जितस्वान्तत्वेन प्रसृमर-परब्रह्म-मननैः
स्वरूपानन्दाब्धावनवरत-लीनाशयतया ।

स्वरूपानन्दाख्यां स्वकृति-सफलीकृत्य सहसा
विलीनस्य ब्रह्मण्यमितपरशान्तेरभिमतम् ॥ ९४

स्थाने तदीये भगवत्पदोक्त-समस्त-सल्लक्षण-भूषितत्वात् ।
श्रीडङ्कपुर्यां क्षितिदेवयुक्तैरस्माभिराराद् विहिताभिषेकम् ॥ ९५

श्रीरुक्मिणीनाग्नजितीमुखाभिः श्रीकृष्णचन्द्रेण पवित्रितायाम् ।
श्रीद्वारवत्यां प्रथित-प्रभाव-श्रीशंकराचार्यगुरूत्तमीये ॥ ९६

वेदान्त-सिद्धान्त-विकासनार्थे व्याख्यान-सिंहासन-भद्रपीठे ।
विप्नाग्रचयुक्तैः सुमुहूर्तकेऽस्मिन् अस्माभिरद्य स्वकराभिषिक्तम् ॥ ९७

विद्वद्व्रात-शिखामणिं शिशुमणिं नीरागचूडामणिम्
शान्त-स्वान्त-शिरोमणिं यतिमणिं तत्वज्ञ-भूषा-मणिम् ।
धर्मप्राणक-शीर्ष-भूषण-मणिं तत्त्वार्थसंस्पृङ्गमणिम्
मोह-ध्वान्त-निवारणाम्बरमणिं धीमन्मणिं चिन्मणिम् ॥ ९८

लक्ष्य-साधन-विबोधक-विद्या-संग्रहं सकलतः सुविधाय ।
निर्मलाचरणभागुपदेशैरन्य-बोधन-कृतार्थित-विद्यम् ॥ ९९

सद्विप्रान्वय-संभव-स्वतनुतां शास्त्रव्रजाधीतितः
सार्थीकृत्य च सांप्रतं श्रुतिशिरोराद्धान्त-सेवाधिया ।
शश्वन्मङ्गल-काङ्क्षि-शिष्ट-जनताभीष्टोपकारावली
स्वाधीताखिल-शास्त्र-वस्तु-निकरैः संपादयन्तं मुदा ॥ १००

अप्यन्यामरमारिराधयिषवो यत्पादपङ्केरुह-
द्वन्द्वाराधनमन्तराय-हतये कुर्वन्त्यवश्यं बुधाः ।
यत्पूजा-बलतोऽभवत्पुरहरिर्वाराणसीडीप्सित-
श्रेणी-वारण-विघ्नवारण-हरिः श्रीवारणास्योऽवतात् ॥ १०१

श्रीशाद्रिजा-धव-विधातृ-समस्त-विद्ये
श्रीशान्ति-दान्ति-मुख-भूतिद-पाद-चिन्ते ।
श्रीशाङ्करार्यकरपद्म-समर्चिताङ्घ्रे (कृतप्रतिष्ठे)
श्रीशारदाम्ब जगदम्ब मदम्ब पाहि । १०२

भूमिभूमिपतितामुखभूति-भुक्तिमुक्तिविभवस्पृशिदक्षे ।
भावभारमखिलेश्वरि भृत्वा भार्गवीममवसर्वंसवित्रि ॥ १०३

अप्यसुहारिण्यापत् सुतरां सुतरा यदीय-दययैषा ।
मृत्यु-विदारि-कुठार-स्वाख्या ललितावताल्ललिता ॥ १०४

दीर्घायू, रोगहंत्री, दृढतनु, धिषणा, गीर्झरी, स्वापतेया-
द्याकारां श्राणयित्वा जगदुपकृतिकृत्कृत्यकृत्यै समस्ताम् ।
सामग्रीमद्रिजाताजलनिधितनुजावाच आत्मासुकान्तै-
र्युक्तादेव्योऽवतैनं सततमभिनवं सच्चिदानन्दसंज्ञम् ॥ १०५

पाया अपायनिकरादनिशं तवाङ्घ्रि-पाथोजपूजनपरायणचित्तपद्मम् ।
सच्चित्प्रमोदनिजसंज्ञमिमं स्वकीय-देवीनिकाययुत-सर्वसुपर्ववर्ग ॥ १०६

अव्याच्चाभेनभेनं दिनकरशशभृन्मासपत्नीतनूज-
श्रीसोदर्यात्मजात-त्रिदश-दितिसुताचार्य-सौर्यादिरूपा ।
स्थित्वा स्थाने स्वकीये निरतिशय-शुभे साकमृक्षैर्ग्रहालि-
र्विद्यामायुर्वितीर्य स्वरुदृढतनुतां तुल्यमृक्षेश्वरेण ॥ १०७

सर्वेषु कालेष्वखिलेषु देशे-
ष्वशेष-रीतिष्वभिलिप्सितानि ।
नारायणांघ्रि-स्मृतयोऽस्मदीयाः
श्रेयांसि सर्वाणि दिशन्तु तुभ्यम् ॥ १०८

॥ ॐ तत्सत् ॥

।। द्वारका - पट्टाभिषेक शुभचिन्तनम् ।।





dwarakasharadapeetham@gmail.com

सर्वोत्कृष्टस्य शाकाहारस्य सुखनिवासस्य कृते

एकम् एव आदर्शं स्थलम्

卐

## रिट्झ हॉटेल

६ वास्वानीमार्गः, पुण्यपत्तनम् ४११००१ [ दूरवाणी २२९९५ ]

dwarakasharadapeetham@gmail.com

22

# शारदा-गौरव-ग्रन्थमाला, 'शारदा', पुणे ३०

| | | |
|---|---|---|
| १. डॉ. राजेन्द्रप्रसादचरितम् | वा. आ. लाटकर | ३.०० |
| २. वात्सल्यरसायनम् | डॉ. श्री. भा. वर्णेकर | १.०० |
| ४. श्रीरामकृष्णपरमहंसीयम् | डॉ. श्री. भा. वर्णेकर | १.२५ |
| ५. बालकानां जवाहरः | पं. विघ्नहरि भा. देव | १.०० |
| ६. श्रीमान् विन्स्टनः चर्चिलः | पं.वा.ना.औदुम्बरकरशास्त्री | १.०० |
| ७. अप्पाशास्त्री : साहित्यसमीक्षा | प्रा. अशोक अकलूजकर | २.०० |
| ८. श्रीशिवराज्योदयम् | डॉ. श्री. भा. वर्णेकर | ४०.०० |
| (साहित्य अकादमी पारितोषिकम् १९७५) | | |
| ९. 'समानमस्तु वो मनः' | डॉ. ग. बा. पळसुले | ३.०० |
| १०. मराठी-संस्कृत-शब्दकोषः | जोशी-परांजपे-गाडगीळ | २५.०० |
| ११. भूपो भिषक्त्वं गतः | पं. ग. पां. लोण्ढेशास्त्री | १.०० |
| १२. विनायक-वीर-गाथा | डॉ. ग. बा. पळसुले | ३.०० |
| १३. आङ्ग्ल-लघु-काव्यानुवादमाला | पं. ल. ज. खरे | २.०० |
| १४. श्रीराजयोगभाष्यम् | डॉ. चिं. त्र्यं. केङ्घे | ५.०० |
| १५. मुक्तक-मञ्जूषा | पं. दि. दा. बहुलीकर | २.०० |
| १६. ललित-गीता-लहरी | पं. ओगेटि परीक्षित्शर्मा | १.०० |
| १९. संस्कृत-प्रगति-पथे कः तिष्ठति ? | पं. ल. म. चक्रदेव | २.०० |
| २०. शाङ्कर-दिग्विजयः | श्रीविद्यारण्यः | ८.०० |
| २१. शिष्यलेखः (चन्द्रगोमिपादः) | डॉ. प. ल. वैद्य | ५.०० |
| २२. महात्म-चरितम् | पं. पं. ना. पाठक | २.०० |
| २३. स्तोत्र-पञ्चदशी | पं. म. स. आपटीकर | १.०० |
| २४. धन्येयं गायनी कला | डॉ. ग. बा. पळसुले | १.०० |
| २५. विवेकानन्द-चरितम् | डॉ. ग. बा. पळसुले | १०.०० |
| २६. शारदा-प्रसादः | पं. दत्तात्रेयशास्त्री दाणी | २.०० |
| २७. अरविन्दचरितम् | पं. यज्ञेश्वरशास्त्री | ३.०० |
| २८. धन्योऽहं धन्योऽहम् | डॉ. ग. बा. पळसुले | ५.०० |
| २९. खेटग्रामस्य चक्रोद्भवः | डॉ. ग. बा. पळसुले | १.०० |
| ३०. अप्पाशास्त्रि-चरितम् | पं. वा. ना. औदुम्बरकर | ४०.०० |

23

| | | |
|---|---|---|
| ३१. शिवराजाभिषेकम् | डॉ. श्री. भा. वर्णेकरः | १०.०० |

(महाराष्ट्रशासनस्य पुरस्कारेण प्रकाशितम्)

| | | |
|---|---|---|
| ३२,३५. श्रीगणपतिवाक्यार्थमहासभा | पं. वसन्त अ. गाडगीळ | ५.०० |
| ३६. श्रीविष्णु-सहस्र-नाम-स्तोत्रम् | पं. भीमाशंकर त्र्यं. केण्ढे | २५.०० |
| ३७. यशोधरा-महाकाव्यम् | पं. ओगेटि परीक्षित्शर्मा | १५.०० |
| ३८. श्रीविष्णुसहस्रनामावलिः। | पं. वसन्त अ. गाडगीळ | २.०० |
| ३९. मनोबोधः। | श्रीरामदासानुदासः | १.२५ |
| ४०. उपनिषन्मधु | मनोहर दिवाण | ५.०० |
| ४१. संशयरत्नमाला | प्रा. नलिनी पराडकर | १.५० |
| ४२. स्तोत्राष्टकम् | विद्वान् बालगणपतिभट्टः | १.५० |
| ४३. गणयज्ञभागः | प्रा. कमलारत्नम् | १.०० |
| ४४. स्तोत्ररत्नमाला | प्रा. ह. त्र्यं. देसाई | १.५० |
| ४५. श्रीशरन्नवरात्रचम्पूः | पं. को. कृष्ण जोयसर् | ५.०० |
| ४६. भारतीय-राजनीति-प्रकाशः | पं. राजेश्वरशास्त्री द्रवीड | १५.०० |
| ४७. हरिपाठः। | पं. म. स. आपटीकर | २.५० |
| ४८. ते वयं पारसीकाः | डॉ. त्रि. ना. धर्माधिकारी | २.५० |
| ४९. संस्कृत-नियतकालिक-सूची | पं. वसन्त अनन्त गाडगीळ | १.०० |
| ५०. श्रीगणपति-वाक्यार्थ-महासभा | पं. वसन्त अनन्त गाडगीळ | ५.०० |
| ५१. श्रीतुलसी-मानस-नलिनम् | नलिनी साधले (पराडकर) | ४०.०० |
| ५२. श्र म गी ता | डॉ. श्री. भा. वर्णेकर | २.०० |
| ५५. श्रीगणपति-वाक्यार्थ-महासभा | पं. वसन्त अनन्त गाडगीळ | ५.०० |
| ५६. श्रीललिता-त्रिशती-स्तोत्रम् | पं. वसन्त अनन्त गाडगीळ | १.५० |
| ५७. श्रीललिता-सहस्रनाम-स्तोत्रम् | पं. वसन्त अनन्त गाडगीळ | ३.०० |
| ५८. भासोऽहासः | डॉ. ग. बा. पळसुले | १०.०० |
| ५९. संस्कृतमञ्जरी | पं. अद्वैतचरणधलः | ५.०० |
| ६०. करवीरागमोत्सवः | पं. फलटणकरशास्त्री | ३.०० |
| ६१. संघात्मा-गुरुजिः | प्रा. ह. त्र्यं. देसाई | २०.०० |

'शारदा'-कार्यालयः, झेलम, पत्रकारनगरी, पुण्यपत्तनम् ४११०१६

dwarakasharadapeetham@gmail.com

॥ द्वारका - पट्टाभिषेक - शुभचिन्तनम् ॥

होमिओपाथ-औषधि-क्षेत्रे भारतवर्ष अग्रेसराः ।

**रॉय ॲण्ड कम्पनी**

१७६ शामलदास गान्धी मार्गः (प्रिन्सेस स्ट्रीट), मुम्बई २

शारदा - संस्कृत - पाक्षिकस्य

सा भि न न्द न म्

शु भ चि न्त न म्

**का का ह ल वा ई**

श्रीमन्त दगडूहलवाई-दत्तमन्दिरसमीपे, पुण्यपत्तनम् ४११००२

डे. जिमखाना पुण्यपत्तनम् ४११ ००४

टिळक-मार्गः पुण्यपत्तनम् ३०




पश्चिमाम्नाय - द्वारका - शारदापीठ - जगद्गुरु - श्रीशंकराचार्य

**ब्रह्मीभूत-प. पू. श्रीअभिनवसच्चिदानन्दसरस्वती**

**आविर्भावः २५-९-१९१९ पीठाभिषेकः २०-६-१९४५ समाधिः ७-४-१९८२**

शारदा, पुणें १६. २३:१४ (वार्षिकं मूल्यं रू.२० ★ अस्य अङ्कस्य रू.१.२५)
लायसेन्स क्र. ७१ टु पोस्ट विदौट प्रीपेमेण्ट रजि. क्र. पीएन्सीडब्ल्यू १०७
पुण्यपत्तने ४११०३० पृथक्करण-कार्यालयाय २५-५-८२ दिने समर्पितम्

## उपेक्षित-दुर्बल-विकासार्थं विंशति-सूत्र-कार्यक्रमः ।

नूतन-विंशति-सूत्र-कार्यक्रमम् अनुसृत्य अधोदारिद्र्य-रेषाजीवनानां जीवनमानं उन्नेतुं तथैव समाजे अतिदुर्बल-घटकानाम् आर्थिकं सामाजिकं च विकासं यथाक्रमं साधयितुं महाराष्ट्रस्य षष्ठ-पाञ्चवार्षिक-योजनायाः प्रमुखोद्दिष्ट-निर्धारः। तदर्थं सांप्रतिकवर्षे अर्थसंकल्पे २६१ कोटिरूप्यकाः कल्पिताः। कोटयर्धजनाः तेन लाभान्विताः स्युः।

- दैनंदिन-वृत्ति-निश्चय-योजनायां खेटकेषु सार्धपञ्च-लक्ष-कर्मकराणां कृते कार्यं दापयितुं ७२ कोटिरूप्यकाः। तस्मात् १०.५० कोटिमानव्य-दिन-वृत्तिः समुपलप्स्यते।
- आश्रय-शून्यानां कृते गृह-निर्माणार्थं जीर्णानां पुनर् निर्माणाय १३ कोटिरूप्यकाः कल्पिताः। ७५००० कुटुम्बानि तेन लाभान्वितानि स्युः।
- कुटीर-परिसर-सुधारणार्थं तत्र विविध-सौविध्यार्थं च ४.५ कोटिरूप्यकाः कल्पिताः। तस्मात् २.५ लक्षकुटुम्बानि लाभान्वितानि स्युः।
- प्रायः २६९००० निराधाराणां कृते २० कोटि-रूप्यकानुदानम्। १,३०,००० अर्थिनां कृते कोटिपञ्चकरूप्यक-साहाय्यं दित्स्यते।

**अधो-दारिद्र्य-रेषा-जनानाम् आत्मनिर्भरतासंकल्पः।**

DGIPR/82

संपादकः मुद्रकः प्रकाशकः स्वामी — वसन्त अनन्त गाडगीळ बी.ए.बी.एड्.
मुद्रण-स्थलम् — यशवन्त मुद्रणालयः १८३५ सदाशिव, पुण्यपत्तनम् ३०
प्रकाशनस्थलम् – मालती चक्रदेव, २९९ राममोहनमार्गः, मुम्बापुरी ४.
शारदा, २ झेलम, पत्रकारनगरी, पुणें ४११०१६
(दूरवाणी — ५२१२४, निवासः — ३१६१६)

This book
“H.H Swami Sri Swaroopananda Saraswati Ji Maharaj(Jagadguru Shankaracharya of Uttaramnaya Badari Jyotirmath) Pattabhishekam in Jagadguru Shankaracharya Paschimamnaya Dwaraka Sharada Peeth”

Historical Documents
by
H.H Swami Sri Govindananda Saraswati ji
( Badari, Dwaraka Peetha )
Research & IT Team

More info
dwarakasharadapeetham@gmail.com